


द्विदिवसात्मिका राष्ट्रियसंगोष्ठी

संस्कृतवाङ्मयेऽनुसन्धानसापेक्षविषया

दिनाङ्कः- फेब्रुयारी २७-२८, २०१९

संस्कृतविभागः, गङ्गाधरमेहेरविश्वविद्यालयः,
अमृतविहारः, सम्बलपुरम्, ओड़िशा, ७६८००४

मुख्यसंरक्षकः-

डाँ.अतनुकुमारपतिः, कुलपतिः

संरक्षकौ

श्रीगिरिशचन्द्रसिहः, कुलसचिवः

श्रीउमाचरणपतिः, उपकुलसचिवः

निर्देशकः

डाँ. लम्बोदरसाहुः, भारप्राप्तविभागमुख्यः

संयोजकः

श्रीधर्मराजबागः,

सहायकः अध्यापकः, संस्कृतविभागः

आयोजनसचिवः

डाँ. राकेशकुमारमिश्रः,

सहायकः आचार्यः, संस्कृतविभागः

## संस्कृतविभागः-

ओड़िशाप्रदेशस्य पश्चिमभागस्य बहवः छात्राः अध्ययनाय अत्रागच्छन्ति। अत्र स्नातक-स्नातकोत्तर-कलाभूषण-पाठ्यक्रमाः सन्ति। पुनः अस्मिन् वर्षे कलाविभूषण-पाठ्यक्रमोऽपि प्रारब्धो अभवत्। अत्र प्रायशः २०० छात्राः पठन्ति। छात्राणां संस्कृतज्ञानवर्धनार्थं संस्कृतभित्तिककार्यम् बहु आयोज्यते। अस्य विश्वविद्यालयस्य स्नातकोत्तरपाठ्यक्रमः संस्कृतभाषायाम् एव निबद्धः। पुनः विभागपक्षतः "श्रद्धा" नामधेया वर्षिकी शोधपत्रिकाऽपि प्रकाशिता भवति।

## संस्कृतभाषा-

**"भाषासु मधुरा मुख्या दिव्या गीर्वाणभारती"**। विश्वस्य सर्वासु भाषासु प्राचीनतमा संस्कृतभाषा, यस्याः धारा वैदिकयुगादारभ्य अद्यावधि निरवच्छिन्नरूपेण प्रवहति। भारतवर्षस्य समग्रमपि प्राचीनवाङ्मयमिमां भाषामाश्रित्यैवावतिष्ठते। अस्यां भाषायां यथा ज्ञान-विज्ञान-कला-संस्कृति-धर्म-दर्शनार्थशास्त्र-काव्यशास्त्र-व्याकरणायुर्वेदादिविषयसम्बलितं विशालं वाङ्मयमुपलभ्यते तथा न कुत्रापि अन्यत्र दृश्यते। यद्यपि इयं भाषाऽतीव प्राचीना तथापि आधुनिककालेऽपि बहुगरुत्वमावहति। यतो हि इयं भाषा वैज्ञानिकपद्धत्या सम्पन्ना सम्मर्जिता चाऽस्ति। एतदर्थमेव साम्प्रतिककाले सर्वे सङ्गणकवैज्ञानिकाः समानस्वरेण मुक्तकण्ठेन च स्वीकुर्वन्ति यत् संस्कृतभाषा सङ्गणकस्य कृते कार्यदक्षा भाषा भवितुमर्हति। इदानीमपि इयं भाषा समाजस्य हितसाधयित्री भाषा अस्ति। अतः अनिवार्यविषयायाः अस्याः संस्कृतभाषायाः उपरि भूयो भूयोऽनुसन्धानं करणीयमिति विचिन्त्य **"संस्कृतवाङ्मयेऽनुसन्धानसापेक्षविषया"** इति विषयः अस्माभिः निर्धारितः।

## सम्बलपुरम्-

ओड़िशाप्रदेशस्य पञ्चमहानगरेषु सम्बलपुरमेकं प्रमुखं महानगरम्। इदं मण्डलं महानदीतीरेऽवस्थितम्। तत्र पुनः आराध्यदेवी अलौकिकप्रतिभासम्पन्ना माता समलेश्वरी समलेई वा विराजिता। अस्य मृत्तिका वीरसुरेन्द्रसायादीनां बहुस्वाधीनतासंग्रामिणां जन्मभूमिः। ओड़िशाप्रदेशस्य पश्चिमभागस्य नगरमिदं केन्द्राञ्चलम्। ओड़िशाप्रदेशस्य पश्चिमभागे प्रचलिता भाषा अस्य एव नगरस्य नाम्नः आधारेण "सम्बलपुरी" इति उच्यते। "हीराकुद" इति पृथिव्याः बृहत्तमजलबन्धस्य, प्रसिद्धशीतलषष्ठीयात्रायाः, प्रसिद्धसम्बलपुरलोकमहोत्सवस्य, सुमधुरसङ्गीतस्य हृदयाह्लादकवाद्यस्य चादीनां संस्पर्शेन नगरमिदं दर्शनीयं, शोभनीयं, रमणीयञ्च भवति। संक्षेपेण नगरमिदं भवति ओड़िशियाः प्रमुखसांस्कृतिकक्षेत्रं तथा भारतस्य पर्यटनक्षेत्रम्।

## गङ्गाधरमेहेरविश्वविद्यालयः-

अयं विश्वविद्यालयः ओड़िशाप्रदेशस्य पश्चिमभागे सम्बलपुरमण्डले विराजते। १९४४ तमे ख्रीष्टियवर्षे सम्बलपुरमहाविद्यालयरूपेणास्य विश्वविद्यालयस्य स्थापना जाता। ततः १९४९ तमे ख्रीष्टियवर्षे प्रसिद्धोड़िआकविगङ्गाधरमेहेरस्य नाम्नायं विश्वविद्यालयः परिचितः। ततः २०१५ तमे ख्रीष्टियवर्षे विश्वविद्यालयरूपेण । अयं विश्वविद्यालयः ओड़िशाप्रदेशे एकमन्यतमं स्वतन्त्रं च स्थानमलङ्करोति। अस्मिन वर्षे विश्वविद्यालयस्थापनस्य ७५वर्षपूर्तिनिमित्तं प्लाटिनम्-जुबिलीमहोत्सवः परिपाल्यते। अतः वर्षं व्याप्य विविधाः कार्यक्रमाः आयोज्यन्ते। पुनः अस्मिन् वर्षे विश्वविद्यालयस्यास्य प्रथमदीक्षान्तसमारोहः परिपालितः। अस्य विश्वविद्यालयस्य इदानीन्तनाः कुलपतयः सन्ति अतनुकुमारपतिमहाभागाः, धेयवाक्यञ्च "विद्ययाऽमृतमश्नुते" तथा कुलगीतम् - कविगङ्गाधरमेहेरेण विरचिता कविता "विश्व देख मधुमय रे जीवन"।

## परामर्शदातृमण्डली

प्रो.प्रफुल्लकुमारमिश्रः, कुलाधिपतिः,
डि.आर्.पि.सेण्ट्राल आग्रिकल्चराल युनिभरसिटि, बिहारः
प्रो.हरेकृष्णशतपथी, कुलपतिः, कीट्-विश्वविद्यालयः, भुवनेश्वरम्
डाँ. सच्चिदानन्दमहापात्र, कुलसचिवः,
श्रीजगन्नाथविश्वविद्यालयः, पूरी
डाँ. जयन्तीत्रिपाठी, निर्देशिका, सि.ए.एस्.एस्, पुना
प्रो.गोपालकृष्णदाशः, भुवनेश्वरम्
डाँ. रविप्रकाश आर्या, रोहतक, हरियाणा
प्रो.गङ्गाधरपण्डा, वाराणसी
प्रो.अभिराजराजेन्द्रमिश्रः, शिमला, हिमाचलप्रदेशः
प्रो.राधावल्लभत्रिपाठी, भोपालः
प्रो.सदाशिवकुमारद्विवेदी, वाराणसी
डाँ. पुष्पादीक्षितः, विलासपुरम्
डाँ. सुवासचन्द्रदाशः, भुवनेश्वरम्
डाँ. हरेकृष्णमेहेरः, भुवनेश्वरम्
डाँ. जयन्तकुमारत्रिपाठी, सम्बलपुरम्
प्रो.रघुनाथपण्डा, भुवनेश्वरम्
डाँ. सरितापूजारी, सम्बलपुरम्
डाँ. अन्तर्यामीदाशः, बरगड़म्
प्रो. हिमांशुशेखर आचार्यः, अलिगड़म्, उत्तरप्रदेशः
डाँ. फाल्गुनीमहानन्दिआ, बलाङ्गीरम्
डाँ. मनोरञ्जनसेनापतिः, भुवनेश्वरम्
डाँ. निरञ्जशबरः, भुवनेश्वरम्
डाँ.निर्मलसुन्दरमिश्रः, जगतसिंहपुरम्
डाँ. सुरेश्वरमेहेरः, भुवनेश्वरम्
प्रो. रमेशचन्द्रपण्डा, वाराणसी
प्रो.कृष्णकान्तशर्मा, वाराणसी
प्रो.हरीश्वरदीक्षितः, वाराणसी
प्रो.रमाशङ्करमिश्रः, लखनऊ, उत्तरप्रदेशः
प्रो.श्रीकिशोरमिश्र, वाराणसी
प्रो.ऊषाशर्मा, वाराणसी
प्रो.ऊमेशप्रसादसिंहः, वाराणसी
प्रो.राकेशउपाध्यायः, वाराणसी
प्रहल्लाददेवता, सम्बलपुरम्

## नामपञ्जीकरणशुल्कः-

गवेषकछात्राणां कृते- ५००/-
अध्यापकानां कृते- १०००/-

अस्यां संगोष्ठ्यां शोधपत्रं वेद-वेदाङ्ग-साहित्य-व्याकरण-दर्शन-धर्मशास्त्रार्थशास्त्रादीनां येषां केषाञ्चिद् अनुसन्धानयोग्यविषयाणामुपरि आश्रितं भवेत्। शोधपत्रस्य सारांशः २० दिनाङ्कात् प्रागेव प्रेषणीयः।

वैद्युतिकसन्देशः- rkmishrabhu93@gmail.com

## आवासव्यवस्था

अत्र रात्रौ आवासव्यवस्थाऽपि भविष्यति। अतो येऽत्र रात्रौ स्थातुमिच्छन्ति ते फेब्रुयारीमासस्य २३ दिनाङ्कात् पूर्वं सूचयन्तु ।

## आमन्त्रणपत्रम्

मान्याः विद्वद्प्रवराः,

सादरं वन्दनानि

भवतां स्नेहेन, आशीर्वादेन, सहयोगेन हितोपदेशेन चाऽस्माकं विश्वविद्यालयस्य कार्याणि सम्यक्तया परिपूर्यन्ते। विषयमिमं हर्षं हर्षं निवेदयामः यदस्माकं विश्वविद्यालयस्य संस्कृतविभागे राष्ट्रियसंगोष्ठी आगामिनि फेब्रुयारीमासस्य २७-२८ दिनाङ्कयोः सम्पत्स्यते। अत्र विषयोऽस्ति- **संस्कृतवाङ्मयेऽनुसन्धानसापेक्षविषयाः**। अतोऽस्यां संगोष्ठ्यां भवन्तः सपरिवाराः सछात्राः च सादरं समुपस्थिताः सन्तः प्रोत्साहयन्तु इति प्रार्थ्यते।

इति

भवतामागमनाभिलाषिणः

डाँ. राकेशकुमारमिश्रः (९३३६८२४०९८)
श्रीधर्मराजबागः(९१२४७१३९१७)

## प्रापकः

**नाम-**

**संकेतः-**